ISSN : 2350-0700

श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य पुनरीक्षिता सन्दर्भिता शोधपत्रिका

A Peer Reviewed Research Journal of Shree Somnath Sanskrit University

# शोधज्योतिः

# ŚODHAJYOTIḤ

Year-1, Vol.-1 January – December 2019

*Chief Editor*
Prof. Gopabandhu Mishra

*Managing Editor*
Prof. Vinod Kumar Jha

*Editors*
Prof. Archana Kumari Dubey
Dr. Janakisharan Acharya
Dr. Kartik Pandya

SHREE SOMNATH SANSKRIT UNIVERSITY, VERAVAL

**Publisher:**

Dr. Dashrath Jadav

*Registrar*, Shree Somnath Sanskrit University, Veraval

**Advisory Committee:**

Prof. P. N. Shastri

*Vice Chancellor,* Rashtriya Sanskrit Sansthan (Deemed University) New Delhi

Prof. Dev Narayan Jha

*Vice Chancellor,*

Prof. Kamlesh Choksi

*Director, Bhasha Bhavan, Gujarat University, Ahmedabad*

Prof. Harshdev Madhav

*Ahmedabad*

Prof. Rabindra Kumar Panda

*Professor,* Department of Sanskrit, Pali & Prakrit, The M S University, Vadodara

Prof. Devendra Nath Pandeya

*Dean,* Faculty of Veda & Vedanga, Shree Somnath Sanskrit University, Veraval

Dr. Narendrakumar L. Pandya

*Principal,* University Constituent Sanskrit College, Veraval

**Managing Editor**

Prof. Vinod Kumar Jha

**Editorial Committee**

Prof. Archana Dubey

Dr. Janakisharan Acharya

Dr. Kartik Pandya

**Note**: The statements and views expressed by the authors of articles in this Journal are their own and not necessarily of the Editorial Committee. The responsibility of the facts stated, opinions expressed, or conclusions reached, is entirely that of the author of respective research articles and that Shree Somnath Sanskrit University accepts no responsibility for them.

*ISSN* : 2350-0700

*Registration No.* : GH/SH/4/GSU/2997/1607/Pt- III/KH-1 dated 11-04-2005

*Published by* : Shree Somnath Sanskrit University, Veraval, Gujarat – 362 266

*Price* : ₹ 100 Annual Subscription (For India)

*Address* : Shree Somnath Sanskrit University,
Rajendra Bhuvan Road, Veraval, Dist. Gir-Somnath, Gujarat, India – 362 266

*Telephone* : (+91-2876) 244531, 244532

*Email* : shodhjyoti@gmail.com

*Website* : www.sssu.ac.in

Statement about the ownership and other particulars about newspapers

# ŚODHAJYOTIḤ

**A Peer Reviewed Research Journal of Shree Somnath Sanskrit University**

## FORM IV

*(See Rule 8 under Section 5 of the Press and Registration of Book Act, 1867)*

| | | |
|---|---|---|
| 1. | *Place of the Publication:* | Shree Somnath Sanskrit University, Veraval,<br>Gujarat - 362 266 |
| 2. | *Periodicity of its Publication :* | Annual (Yearly) |
| 3. | *Printer's Name :* | Jalaram Graphics & Offset |
| | *Nationality :* | Indian |
| | *Address :* | Near Paramhans Apartment,<br>Behind Kaveri Hotel, S.T. Road, VERAVAL<br>Dist. Gir Somnath, Gujarat - 362 266 |
| 4. | *Publisher's Name :* | The Registrar |
| | *Nationality :* | Indian |
| | *Address :* | Shree Somnath Sanskrit University<br>Rajendra Bhuvan Road, VERAVAL<br>Dist. Gir-Somnath, Gujarat – 362 266 |
| 5. | *Editor's Name :* | Prof. Gopabandhu Mishra |
| | *Nationality :* | Indian |
| | *Address :* | Shree Somnath Sanskrit University<br>Rajendra Bhuvan Road, VERAVAL<br>Dist. Gir-Somnath, Gujarat – 362 266 |
| 6. | *Names & Addresses of Individuals :<br>who own the newspaper and partners<br>or shareholders holding more than<br>one percent of the total capital* | Shree Somnath Sanskrit University<br>Rajendra Bhuvan Road, VERAVAL<br>Dist. Gir-Somnath, Gujarat – 362 266 |

I, Dr. Dashrath Jadav, *Registrar*, Shree Somnath Sanskrit University, Veraval, Gujarat hereby declare that the particulars given above are true to the best of my knowledge and belief.

(Dr. Dashrath Jadav)
Signature of Publisher

# शुभाशंसा

भगवतः श्रीसोमनाथस्य परमानुग्रहेण श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य "शोधज्योतिः" इत्यभिधानं शोधपत्रम् इदम्प्राथम्येन प्राकाश्यमायातीति परमस्य मोदस्यायं विषयो वर्तते।

श्रीसोमनाथो द्वादशसु ज्योतिर्लिङ्गेषु प्रथमज्योतिर्लिङ्गत्वेन सुतरामखिलैः उपास्योऽस्ति। साम्बसदाशिवस्येदं ज्योतिस्स्वरूपं मनसि निधाय तस्य चिदानन्दरूपं सर्वथा सर्वैः ध्यायते। तथा चाह भगवत्पादः आद्यश्रीशङ्कराचार्यः -

"चिदानन्दरूपः शिवोऽहं शिवोऽहम्" इति। प्रसङ्गे एतस्मिन् परमशिवस्य रूपसङ्कल्पनायाम् एकतः "ज्योतिस्स्वरूपम्", अपरतः "चिदानन्दरूपम्" सुतरां द्योतितमस्ति। अर्थात् सकलानां प्राणिनाम् अन्तःकरणे यः परमात्मा शिवस्वरूपः ज्योतिरिव नित्यं द्योतमानमस्ति सः स्वयं प्राणिषु चैतन्यं निदधाति आनन्दं च जनयति। बहिरङ्गतया स्थूलतया दृश्यमाने संसारे प्राणिशरीरे च एतत् सूक्ष्मं सत्त्वं निरीक्षितुं पारेदृश्वानाः ऋषयः दार्शनिकाः प्रभवन्तितराम्। एषा निरीक्षा शोधदृष्टिरित्याख्यायाऽभिधातुं शक्यते। तथा च एतादृश्या शोधदृष्ट्या यत् ज्ञानज्योतिः उदेति तेन समग्रं जगत् उद्भासितं भवति। यद्यपि तमः घनीभूतं व्यापकं विशालं च भवति तथापि लघुकायेऽपि ज्योतिषि एव तम् अपाकर्तुं यत्नः स्वयमेव विद्यमानो भवति। विश्वकविः रवीन्द्रनाथ ठाकुरोऽपि आह - तमोऽस्ति, तमोऽस्ति इति कथनमात्रेण तमः न दूरीभवति, तदर्थम् एको लघुः प्रदीपः ज्वालनीयो भवति। तमः स्वयमेव अपसरति। "शोधज्योति"रित्याख्यं शोधपत्रमिदं संस्कृतं भारतीयां च संस्कृतिमाश्रित्य अखिले जनमानसे यद् भ्रान्तिरूपं तमो व्याप्तमस्ति, तथा च श्रुति-स्मृति-वेदाङ्ग-पुराणोनिषदादि-रामायणमहाभारत-विविधदर्शन-नानाविधकाव्यनाटकादि-नाट्यशास्त्रार्थशास्त्रादि-प्रकाश्यप्रकाशितासंख्याकपाण्डुलिप्यादिगतविषयेषु अज्ञानाल्पज्ञानांशिकज्ञानादिजन्यं यत् तमः प्रसृतमस्ति तदपाकर्तुम् अनवरतं श्रद्धया निष्ठया प्रसरतुतरामिति भगवान् श्रीसोमनाथो भूयो भूयः सम्प्रार्थ्यते।

संस्कृत-हिन्दी-आङ्ग्लेति भाषात्रयेण आत्मनः कलेवरं विभूषयत् शोधपत्रमिदम् अवश्यप्रकाश्यमिति बहुकालतः विश्वविद्यालयेन निर्णये कृतेऽपि एतावतन्तं कालं यावत् प्रकाशितं नासीत्। तदिदानीम् एतस्य प्रथमोऽवतारः प्रभातेऽरुणोदय इव ज्योतिषं विभावयति इति एतदर्थमेतस्य सम्पादने प्रकाशने च तत्परः सहमुख्यसम्पादकः सम्पादकगणः सुतरां श्लाघ्यो विद्यते। एतस्य प्रकाशनाय विश्वविद्यालस्य प्राशासनिको भागो वित्तविभागः शोधसंवर्गश्च धन्यवादैः सभाज्यन्ते।

शोधपत्रमिदं "भानुः सकृद्युक्ततुरङ्ग एव" इति महाकवेः कालिदासस्य वचोऽनुसृत्य अद्यतनात् अरुणोदयादारभ्य अविश्रान्तं नियमिततया प्राकाश्यं व्रजेत् तथा च "पूर्णता गौरवाय" इति विश्वविद्यालयस्य कालिदासोक्तपङ्क्त्याश्रितं ध्येयवाक्यं साधयितुं सर्वथा स्तरीयशोधलेखानां सम्यक्तया प्रामाणिकतया च प्रकाशनेन देशे विदेशेषु च विश्वविद्यालयस्य गौरवं वर्धयेद् इत्येतदर्थं श्रीसोमनाथः शुभानुग्रहं सततं विदध्यात् इति तं सम्प्रार्थ्य विरम्यते।

गोपबन्धु मिश्रः<br>कुलपतिः

# सम्पादकीयम्

भगवतः ससोमस्य श्रीसोमनाथस्य परमानुग्रहेण यद्विद्वज्जनमनश्चकोरकौमुदी "शोधज्योतिः" इत्यभिधेया श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य पुनरीक्षिता सन्दर्भिता शोधपुष्करिणीव शोधपत्रिका प्राकाश्यम् आनीयते इति महतः हर्षप्रकर्षस्यायं विषयो वर्तते। श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य काचित् शोधपत्रिका स्यादिति विचारः २०१४ तमे वर्षे तत्कालीनकुलपतेः प्रो. वेम्पटिकुटुम्बशास्त्रिणः कार्यकाले सङ्कल्पितः आसीत्। परम् अस्याः शोधपत्रिकायाः प्रकाशनं न सञ्जातम्। अथोऽथ श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य वर्तमानकुलपतिवर्याः प्रो. गोपबन्धुमिश्रवर्याणां प्रेरणया मार्गदर्शनेन च अस्याः शोधपत्रिकायाः प्रथमोऽङ्कः प्राकाश्यमानीतो वर्तते।

अस्मिन्नङ्के विद्वज्जनकृतावगाहशास्त्राज्ञानान्विताः नवदशशोधलेखाः विद्यन्ते ये च ननवोन्मेषशालिप्रतिभावतां शास्त्रप्रविविक्षूणां शोधच्छात्राणां कृते नूनम् उपादेयाः सन्ति। एतेषु शोधलेखेषु प्राच्यपरम्परानुरूपं शास्त्रार्थपद्धत्या तथा च युक्तियुक्तं पूर्वापरपक्षव्याख्यापरम्परामनुसृत्य परस्परं प्रतिपदसिद्धान्तसमीक्षणेन वेद-वेदान्त-व्याकरण-दर्शन-साहित्य-ज्योतिषादिविषयाणां गभीरोऽपि विषयः सरलया शैल्या विवेचितो वर्तते। तत्तच्छास्त्रविदुषां गभीरालेखेन सह शोधच्छात्रेष्वपि लेखनकलां वर्धयितुं तेषामपि शोधनिबन्धानामत्र स्थानं कल्पितमस्ति यच्च शोधपत्रिकायाः सर्वोपयोगित्वं साधयति अन्यांश्च प्रेरयति। अत्र केचन शास्त्रीया निबन्धाः प्राच्यव्याख्यानपरम्परां स्मारयन्ति। केचन गभीरतममपि विषयं सर्वजनबोधजनिकां लेखनकलां शिक्षयन्ति।

प्रो. विनोदकुमार झा परमलघुमञ्जूषायाः आलोके नामार्थविचारं प्रास्तौत् स्वकीयशोधपत्रे। मीमांसकास्तावत् शब्दानां शक्तिं जातौ स्वीकुर्वन्ति न तु व्यक्तौ, वैयाकरणास्तु जातिविशिष्टव्यक्तौ शब्दार्थशक्तिम् अभ्युपगच्छन्ति। अत्र प्रो. झावर्येण शास्त्रोक्तरीत्या पूर्वपक्षम् उद्भाव्य वैयाकरणानां मतं प्रमाणैः पुष्टीकृतम्। भवभूतेः कारुण्यं लिखन्ती प्रो. अर्चनादुबे स्वशोधपत्रमाध्यमेन करुणरसं सर्वरसाधाररूपेण प्रास्तौत्। वेदानां संरक्षणे विकृतिपाठाः कथम् उपकुर्वन्तीति विषये डॉ. शत्रुघ्नपाणिग्राही सोदाहरणं व्यवर्णयत्। "अवस्थात्रये वृत्तिविचारः" इति विषये डॉ जानकीशरण

आचार्येण उपनिषत्सु अवस्थात्रयनिरूपणस्य किं प्रयोजनमस्तीति सम्यक् निरूपितम्। कालविषयकं कलनम् अत्यन्तं सूक्ष्मम् अस्ति। सुनिताबेन-ठक्करवर्यया “कालविमर्शः” इत्याख्ये शोधलेखे भारतीयवाङ्मयदिशा कालस्य सूक्ष्मं विवेचनं प्रस्तुतम्। दर्शनशास्त्रेषु प्रसिद्धे सृष्टिकारणवादविषये नैकानि मतानि विद्यन्ते। तत्र ब्रह्मसूत्रशाङ्करभाष्योपरि श्रीमदप्पयदीक्षितैः “न्यायरक्षामणिः” विरचिता वर्तते। तत्र अस्य जगतः कारणं किं हिरण्यगर्भः भवितुमर्हति उत न इति यः विचारः उद्भावितः तमेव अनुसृत्य श्रीगणेशहेगडेवर्यः वेदान्तदर्शनस्य शास्त्रार्थपद्धत्या स्वविषयं सम्यक्तया अमण्डयत्। डॉ. पूनम घई महोदयायाः शोधपत्रम् “लीलावती में काव्यसौन्दर्य” इति ज्योतिषसाहित्ययोः काव्यनिदर्शनविषये सेतुरूपेण विद्यते। प्रो. देवेन्दनाथपाण्डेयः वैदिकधर्मस्य विश्वकल्याणभावनां न्यरूपयत्। धर्मविचारशास्त्रे मीमांसादर्शने प्रतिपादितं धर्मस्वरूपम् अत्र विशदतया वर्णितमस्ति। आधुनिकलेखकेषु हरिनारायण-दीक्षितः सुप्रसिद्धः कविः विद्यते। तत्कृतं भीष्मचरितम् इत्याख्यम् आधुनिकमहाकाव्यं विद्वत्समवाये लब्धप्रतिष्ठितमस्ति। तत्र प्रयुक्तानां छन्दसां विषये डॉ. कार्तिकपण्ड्यावर्यस्य आलेखः रमणीयो वर्तते। ग्रन्थालयो भवति ज्ञानागारः। अतः ग्रन्थालये विद्यमानस्य ग्रन्थपालस्य आधुनिकतन्त्राधारिते काले भूमिकाविषये तस्य कौशलविषये च आलेखः नूनम् उपादेयो विद्यते। डॉ. जयेशमुङ्गरावर्यस्य आलेखोऽपि आधुनिकदृष्ट्या विदधानोऽस्ति।

अत्रावसरे श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य कुलपतिवर्यान् प्रो. गोपबन्धुमिश्रवर्यान् प्रति वयं कार्तज्ञ्यं विनिवेदयामः। येषां सततं मार्गदर्शनम् अस्याः शोधपत्रिकायाः प्रकाशने हेतुभूतमस्ति। प्रकाशने सर्वविधप्राशासनिकसहयोगं प्रदत्तवद्भ्यः कुलसचिवेभ्यः डॉ. दशरथजादववर्येभ्यः धन्यताभणितयः भण्यन्ते। अस्याः शोधपत्रिकायाः सन्दर्भितपुनरीक्षणे ये विद्वांसः साहाय्यमकार्षुः तान् प्रति कार्तज्ञ्यपुष्पाणि समर्प्यन्ते। अस्याः पत्रिकायाः मार्गदर्शनसमितिसदस्यानामपि यथाकालं मार्गदर्शनं प्राप्तं तस्मात् तान् प्रत्यपि नमोवाकं प्रशास्महे।

अन्ते ते सर्वेऽपि विद्वांसः प्रणम्याः समभ्यर्चनीयाः सन्ति येषामालेखेन पत्रिकेयं गौरवान्विताऽभूत्। ते चाभिवन्दनीया ये प्रकाशने सर्वथा सहयोगं प्रदायानुगृहीतवन्तः।

विद्वज्जनविधेयाः सम्पादकाः

**प्रो. अर्चनाकुमारी दुबे**

**डॉ. जानकीशरण आचार्यः**

**डॉ. कार्तिकपण्ड्या**

# विषयानुक्रमणिका


| | | |
|---|---|---|
| १. नामार्थविचारः (परमलघुमञ्जूषायाः परिप्रेक्ष्ये) | प्रो. विनोद कुमार झा | १ |
| २. कारुण्यं भवभूतिरेव तनुते | प्रो. अर्चनाकुमारी दुबे | ७ |
| ३. अभिज्ञानशकुन्तलङ्लविमर्शः तत्र शिवतत्त्वञ्च | डॉ. ललितः पटेलः | १५ |
| ४. वेदानां संरक्षणे विकृतिपाठानां योगदानम् | डॉ. शत्रुघ्न पाणिग्राही | २१ |
| ५. अवस्थात्रये वृत्तिविचारः | डॉ. जानकीशरण आचार्यः | २७ |
| ६. कालविमर्शः | सुनिताबेन के. ठक्कर | ३३ |
| ७. ज्यौतिषशास्त्रान्यग्रन्थानां सम्मते संस्काराणाम् आधुनिकयुगे महत्त्वम् | डॉ. रमेशचन्द्र शुक्लः | ४९ |
| ८. रसगङ्गाधरे उत्तमोत्तमकाव्यस्योदाहरणे व्यङ्ग्यविमर्शः | जिगर एम्. भट्टः | ६१ |
| ९. काव्यभेदा: | डा. यस्. वि. बी. के. गुप्ता | ६७ |
| १०.वास्तुशास्त्रानुसारं वाटकानिर्माणविधानम् | डॉ. हेमुबेन महेश राठौड | ७१ |
| ११.न्यायकौस्तुभे सङ्गतिनिरूपणम् | मेडूरि. सूर्यनारायणः | ७९ |
| १२.हिरण्यगर्भजगत्कारणत्ववादनिरासः | डॉ. गणेश हेगडे | ८३ |
| १३.गर्भाधान संस्कार | प्रो. कश्यप एम्. त्रिवेदी | ९३ |
| १४.लीलावती में काव्यसौन्दर्य | डॉ. पूनम घई | १०१ |
| १५.Vedic Dharma: A Glorious Theory of Universal Humanity | Prof. D. N. Pandeya | १११ |

१६. Metrical Nuances in BhīṢmacaritam of Hari Narayan Dikshit

Kartik Pandya १२१

१७. Competences and Skills for Librarian in Electronic Era

Ravindra S Kale १४५

१८. Nutrition in Sports Dr. Jayesh D. Mungara १५१

१९. Yoga for Athletes Rekhaben H. Kachadiya १५५

वर्षम् - ०१ अङ्कः - ०१ शोधज्योतिः
जनवरी-दिसम्बर, २०१९ ISSN-2350-0700

# कारुण्यं भवभूतिरेव तनुते

**प्रो. अर्चना दुबे***

"उत्तररामचरितम्" भवभूतेः कवित्वस्य नाट्यकलायाश्च चरमम् उत्कृष्टं निदर्शनमस्ति। स्वयम् अस्य नाटकस्य विधाता स्वीयामिमां कृतिं शब्दब्रह्मविदः प्राज्ञस्य कवेः परिणतां वाचं निजगाद। **"शब्दब्रह्मविदः कवेः प्राज्ञस्य वाणीमिमाम्"**[१] इति।

इदं नाटकं नाटकीयगुणदृष्ट्या प्रशस्यम् अस्त्येव तदपेक्षयाऽपि काव्यात्मकप्रगीतात्मकतत्त्वदृष्ट्या प्रसिद्धिम् आधत्ते। करुणरसस्य यादृशः मार्मिकः परिपाकः अत्र दृश्यते न तथा अन्यत्र क्वचिदपि रसिकैरनुभूयते। अन्यत्र काव्येषु दुर्लभः एतादृशः करुणरसस्यन्दः।

भवभूतेः करुणरसस्य प्रसिद्धिं हिन्दीभाषायाः कवयोऽपि विदन्ति। यतो हि तद्विषये हिन्दीभाषायाः राष्ट्रकविः मैथिलीशरणगुप्तः कथयति यत् –

**करुणे, क्यों रोती है ? उत्तर में और अधिक तू रोयी।**

**मेरी विभूति है जो, उसको भव-भूति, क्यों कहे कोई ? ॥**[२]

उत्तररामचरितस्य प्रधानं कथावस्तुतत्त्वं सीतापरित्यागः एवञ्चान्ते रामसीतयोः पुनर्मेलनम् अस्ति। इदं कथावस्तुनः मूलं सूत्रम् रामायणे दृश्यते। किन्तु तस्य संयोजनायां नाटककृताऽनेन स्वस्य विशिष्टजीवनदर्शनस्य अभिव्यक्तानां कलात्मकानामुद्देश्यानां सिद्धये विविधानि परिवर्त्तनानि परिवर्धनानि च विहितानि। तत्रापि महत्त्वपूर्णतमं परिवर्त्तनं रामायणस्य दुःखान्तकथायाः सुखान्तीकरणम् अस्ति।

प्रथमे अङ्के चित्रदर्शनम्, तृतीये अदृश्यायाः सीतायाः परिकल्पनम्, चतुर्थे

---

* अनुस्नातकविभागाध्यक्षा, श्रीसोमनाथसंस्कृतविश्वविद्यालयः, राजेन्द्रभुवनमार्गः, वेरावलम्-३६२२६६

[१] उत्तररामचरितम् ७.२१

[२] साकेतः नवमसर्गः

कौशल्याजनकारुन्धतीप्रभृतीनां वाल्मीक्याश्रमप्रवासः, पञ्चमे षष्ठे च लवस्य चन्द्रकेतुना सह युद्धम्, सप्तमे च गर्भाङ्कस्य योजना - एतत्सर्वमपि भवभूतेः नूतनचिन्तनोद्भूतम् अस्ति। अत एव उच्यते - "**उत्तरे रामचरिते भवभूतिर्विशिष्यते**"।

मालतीमाधवं महाकवेः भवभूतेः प्रतिभाङ्कुरम्, तदेवाङ्कुरं महावीरचरिते पुष्पितम् अन्ते च उत्तररामचरिते तदेव रसपूर्णफलत्वेन परिणतम्।

## नाट्ये रसः

संस्कृतरूपकेषु आचार्याः रसाख्यं तत्त्वं महत्त्वपूर्णं मन्वते। यथोक्तम् – **"आनन्दनिष्यन्दिषु रूपकेषु"** इति।

भरतमुनिरपि रसमहत्त्वं वर्णयन् नाट्यशास्त्रे उल्लिलेख यत् – **" न हि रसादृते कश्चिदर्थः प्रवर्त्तते"**। आचार्यो धनञ्जयः रूपकानि आनन्दप्रवाहकानि अवोचत्- "**आनन्दनिष्यन्दिषु रूपकेषु व्युत्पत्तिमात्रं फलमल्पबुद्धिः योऽपीतिहासादिवदाह साधुस्तस्मै नमः स्वादुपराङ्मुखाय**"। आचार्यः आनन्दवर्धनोऽपि "अभिनेयार्थं तु सर्वथा रसबन्धे अभिनिवेशः कार्यः" इत्युक्त्वा रसतत्त्वं प्रति आदरभावं प्रादर्शयत्।

कविराजोपाधिना उपहितः विश्वनाथस्तु रसात्मकमेव वाक्यं काव्यं मनुते। सः स्वीये साहित्यदर्पणे तत्प्रतिपादयितुं "**वाक्यं रसात्मकं काव्यम्**" इति जग्रन्थ। इत्थं रसतत्त्वस्य महिमानं सर्वेऽपि आचार्याः अनुमोदयन्तः स्वीचक्रुः। नाट्यभेदकतत्त्वेषु रसः महत्त्वपूर्णः। "**वस्तुनेतारसस्तेषां भेदकः**[३]" इति। नाट्यकाराणाम्– "**एक एव भवेदङ्गी शृङ्गारो वीर एव वा**" इति वचनानुरोधेन नाट्ये शृङ्गारवीरयोरेकः एव रसः अङ्गी भवेत्।

भवभूतिः नाट्यशास्त्रपरम्परामनुसरन् मालतीमाधवाख्ये प्रकरणे शृङ्गाररसं महावीरचरिते च वीररसम् अङ्गित्वेन अतिष्ठिपत्। उत्तररामचरिते तु पूर्वं पालितां सर्वमान्यां परम्पराम् अतिक्रम्य करुणरसम् अङ्गिरसत्वेन प्रातिष्ठिपत्। भवभूतेः करुणरसस्य प्रशंसां कुर्वन् गोवर्धनाचार्यः आर्यासप्तशत्यां कथयति -

**भवभूतेः सम्बन्धाद् भूरेव भारती भाति।**
**एतत्कृतकारुण्ये किमन्यथा रोदिति ग्रावा ॥**[४]

---

[३] दशरूपकम्, १.११

[४] आर्यासप्तशती १.३६

करुणरसस्य हृदयमर्मस्पृशं वर्णनं वीक्ष्य "**कारुण्यं भवभूतिरेव तनुते**" इति यदुच्यते तदनतिशयोक्तिरेव।

## उत्तररामचरिते करुणरसः

उत्तररामचरितं करुणरसप्रधानं नाटकं भवभूतिश्च करुणरसस्य प्रधानः आचार्यः इति सर्वे वदन्ति। भवभूतिः शृङ्गारवीरौ परित्यज्य करुणरसं संस्थापयन् करुणः एव एकः रसः अस्ति इतरे सर्वेऽपि रसाः तद्विवर्ताः निमित्तमात्रेणोत्पन्नाः। यथा आवर्त्तबुद्बुदतरङ्गाः भिन्नाः प्रतीयन्ते परञ्च तत्त्वतोऽभिन्नं जलमेव तत्सर्वम्।

**एको रसः करुण एव निमित्तभेदाद्**
**भिन्नः पृथक्पृथगिवाश्रयते विवर्त्तान्।**
**आवर्त्तबुद्बुदतरङ्गमयान् विकारान्**
**अम्भो यथा सलिलमेव हि तत्समस्तम् ॥**[५]

भवभूतेरिदं मतं यद्यपि विवादस्य विषयः तथापि नात्र सन्देहः यतो हि सः उत्तररामचरिते यथा मानवहृदयस्य शोकानुभूतेः हृदयस्पर्शिचित्रणं चकार तथा संस्कृतसाहित्ये एव न अपितु विश्वसाहित्ये दुर्लभम्।

अत्र शङ्का उदेति यत् उत्तररामचरितस्य मुख्यो रसः करुणः विप्रलम्भशृङ्गारो वा मन्येत? शास्त्रीयदृष्ट्या करुणरसस्य स्थायिभावः शोकः विप्रलम्भस्य च रतिः इति। द्वयोरपि एष एव भेदः यत् यत्र विप्रलम्भः तत्र पुनर्मेलनस्य आशा भवति। करुणे तु विप्रलम्भस्य नाशात् आशायाः स्थितिर्नैव भवति। करुणरसार्थं शोकस्य स्थितिरनिवार्या भवति। "**इष्टनाशादिभिश्चेतो वैक्लव्यं शोकशब्दभाक्**[६]" इति। "**करुणस्तु शापक्लेशविनिपतितेष्टजननाशवधबन्धसमुत्थो निरपेक्षभावः**"[७] इति च।

आचार्यविश्वनाथमतानुसारं यत्र उभयोरेकस्य लोकान्तरे गते सत्यपि पुनर्मेलनस्य आशा वर्त्तमाना भवति तथा द्वितीयः तद्वियोगे व्याकुलताम् अवाप्नोति तत्र करुणो विप्रलम्भो रसो भवति। यथा –

**यूनोरेकतरस्मिन् गतवति लोकान्तरं पुनर्लभ्ये।**
**विमानायते यदैकस्तदा भवेत् करुणविप्रलम्भाख्यः ॥**[८]

---

[५] उत्तररामचरितम्, ३.४७

[६] साहित्यदर्पणः, ३.१७७

[७] नाट्यशास्त्रम्, ६, पृ.३०९

[८] साहित्यदर्पणः, २ पृ. ३०९

लोकान्तरगमने मृत्यौ वा पुनः सङ्गमस्य आशा प्रायो यदा कयाचिद्देवतया आकाशवाण्या वा उच्यते तदा क्रियते। नाट्यशास्त्रीयनियमानुसारं शृङ्गारवीरयोरेकतरस्य अङ्गित्वेन स्वीकृतत्वात् इष्टव्यक्तेः विनाशे सत्यपि पुनर्मेलनस्य स्थितौ "करुणविप्रलम्भो" रसः एव भवेत् न तु "करुणो रसः"। यस्माद्धि अत्र सत्यपि सीतानिर्वासने अन्ते रामसीतयोः पुनर्मेलनं तु भवत्येव, नाटकं तु सुखान्तमेवास्ति। अतः शोकाख्यस्य स्थायिभावस्याभावात् करुणो रसः अत्रास्तीति यदुच्यते तदनुचितमेव। अमुमेव मतं पोषयन्तो बहवो विद्वांसः उत्तररामचरिते करुणरसस्य पुष्टिर्न भवतीति निराहुः। "**पुटपाकप्रतीकाशो रामस्य करुणो रसः**[९]" इत्यनुसारमपि अत्र करुणरसस्य पुष्टिः न भवति। करुणस्त्वत्र पुटपाक एव तिष्ठति। इत्थमेव "**अनिर्भिन्नो गभीरत्वादन्तर्गूढघनव्यथः**[१०]" इत्यादिभिरुक्तिभिरपि इदमेव व्यज्यते यदत्र शोकः स्थायिभावत्वं नैवाधितिष्ठति। शोकस्त्वत्र अनिर्भिन्नः अन्तर्गूढः एव।

अपरोऽपि एकः तर्कः अत्र करुणरसस्य खण्डनं कर्तुमुपस्थाप्यते यत् सीतायाः अमङ्गलं प्रति सामाजिकाः पाठकाश्च आशावन्तः सन्ति। "**सर्वथा ऋषयो देवताश्च श्रेयो विधास्यन्ति**" इति आरम्भे एव नटस्य कथनात् तेषाम् मङ्गलस्य आशा वरीवर्त्तते। अथ च सीतायाः निर्वासनात् परं द्वितीये अङ्के आत्रेय्याः कथनादपि सामाजिकाः विदन्ति यत् सीतायाः कौशल्यमस्ति तस्याः च द्वावपि सुतौ वाल्मीकेराश्रमे कुशलिनौ विद्येते। रसानुभवस्तु सहृदयानां भवति इत्थमत्र करुणरसस्य पुष्टिर्न सम्भवति। अतः सम्पूर्णे नाटके करुणविप्रलम्भशृङ्गारो रसः न तु करुणः इति। किन्तु नैतत् सत्यम्। यद्यपि भवभूतिः शास्त्रीयनियमानां पालनं विदधानः मालतीमाधवे महावीरचरिते च क्रमात् शृङ्गारं वीरञ्च रसम् अतिष्ठिपत् तथाऽपि उत्तररामचरिते इतरेषां नाट्यशास्त्रीयनियमानां पालनं कुर्वन्नपि अङ्गिरसनियमं नैव सः स्व्यकार्षीत्। अङ्गिरसस्त्वत्र करुण एव अस्ति सिद्धान्तः। अत्र नूनमेव कविना शास्त्रीयायाः प्रचलितायाः सरणेः अस्वीकारं कृत्वा नूतना सरणिः स्वीकृता।

करुणरसस्य अत्र बहूनि कारणानि भवितुं शक्यन्ते। एकस्तु उत्तररामचरितस्य कथा रामायणाश्रिता। यस्य च रामायणस्य उत्पत्तौ मूलं करुणरसः एव -

**काव्यस्यात्मा स एवार्थस्तथा चादिकवेः पुरा।**
**क्रौञ्चद्वन्द्ववियोगोत्थः शोकः श्लोकत्वमागतः।।**[११]

वाल्मीकिरामायणस्य कथावस्तुनि करुणरसस्य प्रामुख्यम् अवलोक्य शोकं प्रधानीकृत्यैव तदाश्रितं करुणरसप्रधानं नाटकं सृष्टवान् स्यात् इति। रामसीतयोरन्ते मेलनात् अत्र करुणरसः नैवास्तीत्ययं तर्कः

---

[९] उत्तररामचरितम्, ३.१

[१०] तत्रैव

[११] ध्वन्यालोकः १.५

अनुचितः एव।

साहित्यदर्पणे **"यूनोरेकतरस्मिन्"** इति नियमं उक्त्वा यत्र प्रेमाणयुगलस्य युवकयुवत्योः अविवाहितयोः वा प्रणयिनोः कानिचन दिनानि वियोगः भवति पश्चात् तयोर्मेलनं भवति तत्र करुणो न अपितु विप्रलम्भो रसः इति सिद्धान्तितम्। सः सिद्धान्तः अत्र नैव आपादयितुं शक्यते यतो हि रामसीतयोः सम्बन्धः तादृशः नास्ति नैव इमौ अविवाहितौ प्रणयिनौ न वा युवकयुवत्यौ नैव वा प्रेमाणयुगलौ। इमौ तु दाम्पत्त्यजीवनस्य मूर्त्तिभूतौ आस्ताम्।

श्रीमान् कपिलद्विवेदिवर्यः स्वीयायाम् उत्तररामचरितस्य टीकायां इममेव तर्कमुपस्थाप्य साहित्यदर्पणस्य नियमं व्याख्याय करुणरसः एव प्रकृते नाटके अस्तीति अङ्ग्यकार्षीत्।

## रामपक्षे

सीतायाः परित्यागात् परं रामस्य मनसि तादृशी अवधारणा उदिता आसीत् यत् वने हिंसकाः पशवः सीतायाः अवश्यमेव हननं कृतवन्तः स्युः। सीता जीवति इति तस्य ज्ञानं नासीदेव। अत एव सः स्वात्मानम् "**अपूर्वकर्मचाण्डालं**" नृशंसं पातकिनं च वदन् भृशं रोदिति।

**अपूर्वकर्मचाण्डालमयि मुग्धे विमुञ्च माम्।**
**श्रितासि चन्दनभ्रान्त्या दुर्विपाकं विषद्रुमम् ॥**[12]

मुहुर्मुहुः वियोगस्य कालावधिं "**निरवधिरयं तु प्रविलयः**" इत्यादिकम् अनूचानो रामः तस्य मनसि पुनर्मेलनस्य आशायाः लेशोऽपि नास्ति इति भावं प्रकटयति। अत एवाऽत्र विप्रलम्भो न अपितु करुणः एव सिद्ध्यति।

## सीतापक्षे

तादृशी एव स्थितिः सीतायाः अपि अस्ति, पृथ्वी गङ्गा वाल्मीकिः वा कोऽपि सीतां रामेण ते पुनर्मेलनं भवितेति न समाश्वसिति। सीता सम्पूर्णे नाटके स्वामेव भाग्यरहितां मन्वाना कथयति यत् पुत्रवत्याः मे को लाभः यद्यार्पुत्रः एतयोः पुत्रयोः न स्निह्यति न वा विजानाति। तस्याः रामवियोगे क्षीणामवस्थाम् अवीक्ष्य कविः तां विरहव्यथायाः मूर्त्तिं कथयति - **"करुणस्य मूर्त्तिरथवा शरीरिणी विरहव्यथेव वनमेति जानकी"**[13]।

---

[12] उत्तररामचरितम् १.४६

[13] उत्तररामचरितम्, ३.४

सम्पूर्णे नाटके क्वचिदपि रामः सीता वा पुनर्मेलनस्य तादृशं सङ्केतं न प्राप्नोत् येन तयोः आशायाः उज्जीवनं भवेत्। इत्थं रामदृष्ट्या सीता सर्वथा विनष्टा। सीतादृष्ट्या रामः तस्याः आजीवनं वियुक्तः। तयोः दाम्पत्यं समाप्तम् इति सा मनुते। इत्थं द्वयोरपि पक्षे शोकस्य एव स्थितिः तस्मात् करुणरसस्वीकारे न कोऽपि हानिविशेषः।

## सामाजिकपक्षे

यद्यपि नाटकस्य आरम्भे बहवः तादृशाः सङ्केताः जायन्ते येन सामाजिकाः पाठकाः नाटकमिदं सुखान्तम् इति कल्पयन्ति। आरम्भे एव "**ऋषयो देवताश्च श्रेयो विधास्यन्ति**" इत्युक्त्या एव नाटकस्य सुखान्तत्वम् आपाद्यते। द्वितीये अङ्के आत्रेय्याः कथनेन अपि तथा एव अनुभूयते यत् सीता जीवति। सा पुत्रद्वयं सूतवती तौ पुत्रावपि कुशलिनौ वाल्मीक्याश्रमम् अधिष्ठितौ इति। तृतीये अङ्के अदृश्यां सीतां कल्पितां दृष्ट्वा पाठकाः इतोऽपि आशावन्तः जायन्ते। लवं दृष्ट्वा कौशल्याजनकौ राममुखस्य प्रतिकृतिं तस्य मुखे पश्यतः। अतः आशा तु समेषां दर्शकानां पाठकानां वा मनसि भवति।

किन्तु एतावता एव उत्तररामचरितस्य करुणो रसः नास्ति इति वक्तुं न शक्यते। पाठकाः सामाजिकाः तु कथायाः परिणामं ज्ञात्वैव तत्र प्रवृत्ताः भवन्ति। नाटकं सुखान्तं वा भवेत् दुःखान्तं वा पाठकस्य तस्य सम्पूर्णं ज्ञानं भवति। तथा च नाटकीयैः व्यङ्ग्य-पताकास्थानकप्रभृतिभिरपि माध्यमैः कविः विविधाः कथाः अनेकानि रहस्यानि प्रकटयति।

अतः पाठकानां सामाजिकानां कृते दत्तानां सङ्केतानामाधारेण उत्तररामचरिते करुणरसस्य अभावः अस्तीति वक्तुं नैव शक्यते। सङ्केतास्तु नाटकीयघटनानां कथावस्तुनः च प्राणभूताः। इमे सङ्केताः एव पाठकानां मनस्सु परिणामं प्रति उत्सुकतां सम्पादयन्ति। अन्यथा यदि पाठकस्य सामाजिकस्य मनस्सु सीतायाः लवकुशयोश्च विनाशस्य ज्ञानं जायेत तर्हि सः किमर्थं तं नाटकं पठेदवलोकयेद्वा। इत्थम् एतत्सिद्ध्यति यत् भवभूतेः उत्तररामचरिते शोक एव स्थायिभावः तेन च करुणो रसः एवात्र अङ्गी इति।

उत्तररामचरितस्य प्रायः सर्वाण्यपि अङ्गानि स्पष्टतया प्रकारान्तरेण वा दर्शकानां सामाजिकानां हृदये करुणरसस्य सञ्चारं कारयन्ति। आरम्भे एव वयमवलोकयामो यत् जनकस्य गमनानन्तरं रामः दुःखितां सीतां सान्त्वयति। चित्रदर्शनसमयेऽपि रामसीते अतीतानां कष्टानां स्मरणं कृत्वा सन्तोषमनुभवतः। तयोः सन्तोषोऽपि हृद्येन करुणरसेन सिक्तः अनुभूयते।

**अलसललितमुग्धान्यध्वसंपातखेदाद्-**
**अशिथिलपरिरम्भैर्दत्तसंवाहनानि।**

**परिमृदितमृणालीदुर्बलान्यङ्गकानि**
**त्वमुरसि मम कृत्वा यत्र निद्रामवाप्ता ॥**[14]

पञ्चवट्याः चित्रस्य अवलोकनं कृत्वा रामसीते स्वस्य अतीतस्य वियोगस्य स्मरणं कुर्वाणे व्याकुले भवतः।

सप्तमः गर्भाङ्कः तु तादृशः यत्र तृतीयाङ्कस्यैव उत्कर्षः दृश्यते। अत्र हि जननी वसुन्धरा देवी भागीरथी एवं महर्षिपत्नी अरुन्धती इत्यादयः अलौकिकाः शक्तिवत्यः रामस्य साहाय्यं कुर्वन्ति। स्वस्य कृत्यं तस्य च दुष्परिणामं दृष्ट्वा रामो मुहुर्मुहुः मूर्च्छितो जायते, अथ च पृथिव्याः तीक्ष्णान् सव्यङ्ग्यमाक्षेपान्, गङ्गायाः मुखात् तेषामाक्षेपाणां यथोचितं निराकरणं श्रुत्वा रामस्य धैर्यं व्यपगच्छद्भवति। अस्मिन्नेव वातावरणे भगवती अरुन्धती रामाय सीतां समर्पयति। महर्षिः वाल्मीकिरपि लवकुशौ परिचयं कारयित्वा प्रयच्छति। एतत्सर्वमपि करुणस्य अद्भुतस्य च वातावरणे भवति - **"करुणाद्भुतं किञ्चिदुपनिबद्धम्"।**

अतः प्रथमादङ्कादारभ्य सप्तमाङ्कस्य अन्तं यावत्सामाजिकः पाठकः करुणसागरे अवगाहनं तरणं वा कुर्वाणः "**एको रसः करुण एव**" इत्यस्य अनुभूतिं करोति।

## निष्कर्षः

इत्थं महाकविभवभूतिकृते अस्मिन्नुत्तररामचरिते सर्वत्र करुणरसस्य एव प्राबल्यं दृग्गोचरीभवति, अतः तद्विषये प्रसिद्धः श्लोकः

**अथेदं रक्षोभिः कनकहरिणच्छद्मविधिना**
**तथा वृत्तं पापैर्व्यथयति यथा क्षालितमपि।**
**जनस्थाने शून्ये विकलकरणैरार्द्रचरितै-**
**रपिग्रावा रोदित्यपि दलति वज्रस्य हृदयम् ॥**[15]

इति नितान्तं सत्यं प्रतीयते। उत्तररामचरितस्य करुणरसस्यास्य अनुभूतिः चरमोत्कर्षम् अधिष्ठिता राराज्यते। इदं निश्चप्रचं वक्तुं शक्यते यत् दर्शकाः सामाजिकाः वा करुणरसस्य केवलम् अनुभूतिं कृत्वा शान्ता न जाताः स्युः अपितु तेषां हृदयानि द्रवीभूय नेत्रयोरश्रुधारारूपेण परिणतानि भूत्वा स्यन्दमानानि निर्गतानि स्युः। अतः उत्तररामचरितस्य कृते लोकप्रसिद्धा उक्तिः - **"कारुण्यं भवभूतिरेव तनुते"** अक्षरशः सत्यम् अस्ति।

---

[14] उत्तररामचरितम्, १.२४

[15] उत्तररामचरितम्, १.२८

## सन्दर्भग्रन्थाः

१. उत्तररामचरितम्

२. नाट्यशास्त्रम्

३. साहित्यदर्पणः

४. ध्वन्यालोकः

५. आर्यासप्तशती